प्रतीक्षाचेति आशा स्वर्गादिकमुद्दिश्य: कृतानां कर्मफलानामाशा, ऐहिक जन्म प्राप्तव्यानां कर्मणां फलमिह प्रतीक्षेति तयोर्भेदः संगतम् सत्संगतेः फलं सूनृतां मधुरभाषणस्य फलम् पुण्यम् इष्टापूर्ते यज्ञादीष्ट कर्मणां पूर्तकर्मणां च फलानि सर्वान् च पुत्रान् पशूंश्च इदं सर्वमपि वृङ्क्ते नश्यतीत्यर्थः ॥ ८ ॥

**शाङ्करभाष्य**—*आशाप्रतीक्षेऽनिर्ज्ञातप्राप्येष्टार्थप्रार्थना आशा निर्ज्ञात प्राप्यार्थप्रतीक्षणं प्रतीक्षा ते आशाप्रतीक्षे, संगतं तत्संयोगजं फलम्, सूनृतां च सूनृता हि प्रिया वाक्तन्निमित्तं च, इष्टापूर्ते इष्टं यागज पूर्तमारामादिक्रियाज फलम्, पुत्रपशूंश्च पुत्रांश्च पशूंश्च सर्वानेतत्सर्वं यथोक्त वृङ्क्त आवर्जयति विनाशयतीत्येतत्—पुरुषस्याल्पमेधसोऽल्पप्रज्ञस्य— यस्याननन्भुञ्जानो ब्राह्मणो गृहे वसति। तस्मादनुपेक्षणीयः सर्वावस्थास्वप्यतिथिरित्यर्थः ॥ ८ ॥*

**तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः ।**
**नमस्तेऽस्तु ब्रह्मन् स्वस्तिमेऽस्तु, तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥९ ॥**

**अन्वयः**—हे ब्रह्मन् ! नमस्य, अतिथि यत् (त्वम्) अनश्नन् मे गृहं तिस्रः रात्री, अवात्सीः (हे) ब्रह्मन् ते नमः अस्तु, मे स्वस्ति अस्तु, तस्मात् त्रीन् वरान् प्रतिवृणीष्व ॥ ९ ॥

**शब्दार्थ**—**ब्रह्मन्** = हे ब्राह्मण, **अतिथिः** = अतिथि, **नमस्यः** = नमस्कार योग्य, **अनश्नन्** = बिना खाये हुए, **मे गृहे** = मेरे घर में, **तिस्र** = तीन, **रात्रीः** = रात, **अवात्सीः** = निवास किया है, **मे स्वस्ति** = मेरा कल्याण हो, **वरान्** = वरों को, **प्रतिवृणीष्व** = वरण करो।

**अनुवाद**—**हे ब्राह्मण ! नमस्कार के योग्य अतिथि जो (तुमने) बिना खाये हुए मेरे घर में तीन रात निवास किया है, (अतः) हे ब्राह्मण ! तुम्हें नमस्कार हो, मेरा कल्याण हो, इसलिए तुम तीन वरदान वरण करो ॥ ९ ॥**

**संस्कृत-व्याख्या**—अतिथिमुपेक्षमाणो यमोऽनुतप्यमानो नचिकेतसं व्याजहार—हे ब्रह्मन् ! त्वं नमस्योऽतिथिरभ्यागतोऽसि। यत् अनश्नन् अभुञ्जान एव मे मदीये गृहे त्व तिस्रो रात्रीः अवात्सीरवसः इति मे महान् सन्तापः। नमस्तेऽस्तु त्वां नमस्करोमि आत्मनः अपराधं क्षमायितुं भवन्तमतिथिं च शिष्टाचारेणहमभिवादये। अधुना त्वदाराधनेन मे मम स्वस्ति कल्याणं भवतु त्वं त्रीन् वरान् प्रतिवृणीष्व उररी कुरु स्वीकुरु। यतस्त्वया तिस्रः रात्रीः अनश्नता यापिताः। अतः प्रतिरात्रमेकं वरं प्रति गृहाणेति भावः॥ ९ ॥

**शाङ्करभाष्य**—*तिस्रो रात्रीर्यद्यस्मादवात्सीः उषितवानसि गृहे मे ममानश्नन् हे ब्राह्मन्नतिथिः सन्नमस्यो नमस्कारार्हश्च तस्मान्नमस्ते तुभ्यमस्तु भवत् । हे ब्रह्मन्स्वस्ति भद्र मेऽस्तु तस्माद्भवतोऽनशनेन मद्गृहवासनिमित्तारद्दोषात्तत्प्राप्त्युपशमेन। यद्यपि भवदनुग्रहेण सर्व मम स्वास्ति स्यात्तथापि त्वदधिकसंप्रसादनार्थमनशनेनाषितम् एकैकां रात्रिं प्रति त्रीन्वरान् वृणीष्व अभिप्रेतार्थविशेषाम् प्रार्थयस्व मत्तः॥ ९ ॥*

**शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो ।**
**त्वत्प्रसृष्टं माभिवदेत् प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥ १० ॥**

**अन्वयः**—हे मृत्यो ! यथा गौतमः मा अभि शान्तसंकल्पः सुमनाः वीतमन्युः स्यात् त्वत् प्रसृष्टम् मा अभि प्रतीतः वदेत् एतत् त्रयाणाम् प्रथमम् वरम् वृणे ॥ १० ॥

**शब्दार्थ**—**मृत्यो** = हे यमराज, **गौतम** = गौतमवंश में उत्पन्न मेरे पिता, **मा अभि** = मेरे प्रति, **शान्तसंकल्पः** = शान्त विचार वाले, **सुमनाः** = प्रसन्नचित्त वाले, **वीतमन्युः** = क्रोध रहित, **स्यात्** = हो जायें, **त्वत् प्रसृष्टम्** = आपके द्वारा मृत्युमुख से मुक्त किये गये, **प्रतीतः** = प्रसन्न हुआ, **अभिवदेत्** = बोले, **त्रयाणाम्** = तीन वरदानों में से, **वृणे** = मांगता हूँ।

REDMI NOTE 7
AI DUAL CAMERA

Scanned with CamScanner

**अनुवाद—(नचिकेता ने कहा—) हे यमराज ! जिस प्रकार गौतम (मेरे पिता) मेरे प्रति शान्त विचार वाले, प्रसन्नचित्त वाले, क्रोध रहित हो जायें (तथा) आपके द्वारा मृत्युमुख से मुक्त किये हुए मुझसे प्रसन्न होकर बोलें । यह तीन वरदान में से पहला वरदान मैं मांगता हूँ ॥ १० ॥**

**संस्कृत-व्याख्या—**यमेन वरगृहणायोपचितो नचिकेता यमं प्रथम वरं याचते—हे मृत्यो यमराज! यथा गौतमावाजश्रवसः मे पिता शान्तसंकल्पः विगत चिन्तः सुमनाः स्वस्यचित वीतमन्युर्वीतक्रोधः विगतरोष इति भावः स्यात् । तथा च त्वत्प्रसृष्टं त्वद्विसृष्टं मा माम् स प्रतीतः प्रसन्नमना सन् अभिवदेत् अभिनन्देत् । एतत् अहं त्रयाणां वराणां मध्ये प्रथमं वरं याचामि ॥ १० ॥

**शाङ्करभाष्य—***शान्तसंकल्प उपशान्तः संकल्पो यस्य मां प्रति यमं प्राप्य किं नु करिष्यति मम पुत्र इति स शान्तसंकल्पः सुमनाः प्रसन्नमनाश्च यथा स्याद्वतमन्युविगतरोषश्च गौतमो मम पिता माभि मां प्रति हे मृत्यो किं च त्वत्प्रसृष्टं त्वया विनिर्मुक्तं प्रषितं गृहं प्रति मामभिवदेत्प्रतातो लब्धस्मृतिः स एवायं पुत्रो ममागत इत्येवं प्रत्यभिजनन्नित्यथः। एतत्प्रयोजनं त्रयाणां प्रथममाद्यं वरं वृणे प्रार्थये यत्पितुः परितोषणम् ॥ १० ॥*

**यथा पुरस्ताद्भविता प्रतीत**
**औद्दालकिरारुणिर्मत्प्रसृष्टः ।**
**सुखं रात्रीः शयिता वीतमन्यु-**
**स्त्वां ददृशिवान् मृत्युमुखात् प्रमुक्तम् ॥ ११ ॥**

**अन्वयः** —मत् प्रसृष्टः औद्दालकिः आरुणिः पुरस्तात् यथा प्रतीतः भविता । मृत्युमुखात् प्रमुक्तं त्वाम् ददृशिवान् वीतमन्युः रात्रीः सुखं शयिता ॥ ११ ॥

**शब्दार्थ—मत् प्रसृष्टः** = मेरी कृपा से, **औद्दालकिः आरुणिः** = उद्दालक-वंश में उत्पन्न अरुण का पुत्र, **पुरस्तात्** = पहले के, **यथा** = समान, **प्रतीत** = विश्वस्त , **मृत्यमुखात्** = मृत्यु-मुख से, **प्रमुक्तम्** = छूटे हुओं को, **ददृशिवान्** = देखेगा, **वीतमन्यु** = क्रोधरहित, **रात्रीः** = रात्रियों में, **सुखं शयिता** = सुखपूर्वक सोयेगा ।

**अनुवाद—(यम ने कहा—) मेरी कृपा से उद्दालक-वंश में उत्पन्न अरुण का पुत्र (तुम्हारा पिता) पहले के समान विश्वस्त हो जायेगा । मृत्य के मुख से छूटे हुए तुमको देखेगा (और) क्रोधरहित (वह) रात्रियों में सुखपूर्वक सोयेगा ॥ ११ ॥**

**संस्कृत-व्याख्या—**नचिकेता से प्रथम वरं ददानो यमः तमाह—मत् प्रसृष्टो मम कृपयाविष्ट औद्दालकिः उद्दालकवंशोत्पन्नः आरुणिः अरुणस्यापत्यम् त्वत्पिता पुरस्तात् यथा यथापूर्वं प्रतीतः विस्त्राब्धः (त्वां प्रति) भविता भविष्यति । (एवं च) मृत्युमुखात् यमात् प्रमुक्तम् प्रत्यागतं त्वां ददृशिवान् दृष्टवान् वीतमन्युः क्रोधरहितः (सः) रात्रीः सुखं सुखपूर्वकं शयिता शेष्यते ॥ ११ ॥

**शाङ्करभाष्य—***यथा बुद्धिस्त्वयि पुरस्तात् पूर्वमासीत्स्नेहसमन्विता पितुस्तव भविता प्रीतिसमन्वितस्तव पिता तथैव प्रतीतवान्सन्नौद्दालकिः उद्दालक एवौद्दालकिः । अरुणस्यापत्य मारुणिः, द्वयामुष्यायणो वा । मत्प्रसृष्टो मायानुज्ञातः सन् इतरा अपि रात्रीः सुख प्रसन्नमनाः शयिता स्वप्ता वीतमन्युविगतमन्युश्च भविता स्यात्वां पुत्रं ददृशिवान्दृष्टवान्स मृत्युमुखान्मृत्युगाचरात् प्रमुक्तं सन्तम् ॥ ११ ॥*

**स्वर्गे लोके न भयं किंचनास्ति,**
**न तत्र त्वं, न जरया बिभेति ।**

Scanned with CamScanner